# mahAmahimAnvitaM Adityastotram

# મહામહિમાન્વિતં આદિત્યસ્તોત્રમ્

## Document Information

Text title : Adityastotrams hrImadappayyadIkShitavirachitaM mahAmahimAnvitaM

File name : AdityastotraAppayaDixit.itx

Category : navagraha, stotra, appayya-dIkShita

Location : doc_z_misc_navagraha

Author : Appaya Dixit

Transliterated by : Usha Rani Sanka usharani dot sanka at gmail.com

Proofread by : Usha Rani Sanka usharani dot sanka at gmail.com

Latest update : August 16, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# મહામહિમાન્વિતં આદિત્યસ્તોત્રમ્

અથ શ્રીમદપ્પય્યદીક્ષિતવિરચિતં મહામહિમાન્વિતં આદિત્યસ્તોત્રમ્ ॥

વિસ્તારાયામમાનં દશભિરુપગતો યોજનાનાં સહસ્રૈઃ
ચક્રે પઞ્ચારનાભિત્રિતયવતિ લસન્ નેમિષટ્કે નિવિષ્ટઃ ।
સપ્તચ્છન્દસ્તુરઙ્ગાહિતવહનધુરો હાયનાંશત્રિવર્ગ
વ્યક્તાક્લૃપ્તાખિલાઙ્ગઃ સ્ફુરતુ મમ પુરઃ સ્યન્દનશ્ચણ્ડભાનોઃ ॥ ૧॥

આદિત્યૈરપ્સરોભિર્મુનિભિરહિવરૈર્ગ્રામણીયાતુધાનૈઃ
ગન્ધર્વૈર્વાલખિલ્યૈઃ પરિવૃતદશમાંશસ્ય કૃત્સ્નં રથસ્ય ।
મધ્યં વ્યાપ્યાધિતિષ્ઠન્ મણિરિવ નભસો મણ્ડલશ્ચણ્ડરશ્મેઃ
બ્રહ્મજ્યોતિર્વિવર્તઃ શ્રુતિનિકરઘનીભાવરૂપઃ સમિન્ધે ॥ ૨॥

નિર્ગચ્છન્તોઽર્કબિમ્બાન્ નિખિલજનિભૃતાં હાર્દનાડીપ્રવિષ્ટાઃ
નાડ્યો વસ્વાદિવૃન્દારકગણમધુનસ્તસ્ય નાનાદિગુત્થાઃ ।
વર્ષન્તસ્તોયમુષ્ણં તુહિનમપિ જલાન્યાપિબન્તઃ સમન્તાત્
પિત્રાદીનાં સ્વધૌષધ્યમૃતરસકૃતો ભાન્તિ કાન્તિપ્રરોહાઃ ॥ ૩॥

શ્રેષ્ઠાસ્તેષાં સહસ્રે ત્રિદિવવસુધયોઃ પઞ્ચદિગ્વ્યાપ્તિભાજાં
શુભ્રાંશું તારકૌઘં શશિતનયમુખાન્ પઞ્ચ ચોદ્ભાસયન્તઃ ।
આરોગો ભ્રાજમુખ્યાસ્ત્રિભુવનદહને સપ્તસૂર્યા ભવન્તઃ
સર્વાન્ વ્યાધીન્ સુષુમ્નાપ્રભૃતય ઇહ મે સૂર્યપાદાઃ ક્ષિપન્તુ ॥ ૪॥

આદિત્યાનાશ્રિતાઃ ષણ્ણવતિગુણસહસ્રાન્વિતા રશ્મયોઽન્યે
માસે માસે વિભક્તાસ્ત્રિભુવનભવનં પાવયન્તઃ સ્ફુરન્તિ ।
યેષાં ભુવ્યપ્રચારે જગદવનકૃતાં સપ્તરશ્મ્યુત્થિતાનાં
સંસર્પે ચાધિમાસે વ્રતયજનમુખાઃ સત્ક્રિયાઃ ન ક્રિયન્તે ॥ ૫॥

આદિત્યં મણ્ડલાન્તઃસ્ફુરદરુણવપુસ્તેજસા વ્યાપ્તવિશ્વં
પ્રાતર્મધ્યાહ્નસાયં સમયવિભજનાદૃગ્યજુસ્સામસેવ્યમ્ ।

પ્રાપ્યં ચ પ્રાપકં ચ પ્રથિતમતિપથિજ્ઞાનિનામુત્તરસ્મિન્
સાક્ષાદ્ બ્રહ્મેત્યુપાસ્યં સકલભયહરાભ્યુદ્ગમં સંશ્રયામિ ॥ ૬॥

યચ્છક્ત્યાઽધિષ્ઠિતાનાં તપનહિમજલોત્સર્જનાદિર્જગત્યામ્
આદિત્યાનામશેષઃ પ્રભવતિ નિયતઃ સ્વસ્વમાસાધિકારઃ ।
યત્ પ્રાધાન્યં વ્યનક્તિ સ્વયમપિ ભગવાન્ દ્વાદશસ્તેષુ ભૂત્વા
તં ત્રૈલોક્યસ્ય મૂલં પ્રણમત પરમં દૈવતં સપ્તસપ્તિમ્ ॥ ૭॥

સ્વઃસ્ત્રીગન્ધર્વયક્ષા મુનિવરભુજગા યાતુધાનાશ્ચ નિત્યં
નૃત્તૈર્ગીતૈરભીશુગ્રહનુતિવહનૈરગ્રતઃ સેવયા ચ ।
યસ્ય પ્રીતિં વિતન્વન્ત્યમિતપરિકરા દ્વાદશ દ્વાદશૈતે
હૃદ્યાભિર્વાલખિલ્યાઃ સરણિભણિતિભિસ્તં ભજે લોકબન્ધુમ્ ॥ ૮॥

બ્રહ્માણ્ડે યસ્ય જન્મોદિતમુષસિ પરબ્રહ્મમુખ્યાત્મજસ્ય
ધ્યેયં રૂપં શિરોદોશ્ચરણપદજુષા વ્યાહૃતીનાં ત્રયેણ ।
તત્ સત્યં બ્રહ્મ પશ્યામ્યહરહમભિધં નિત્યમાદિત્યરૂપં
ભૂતાનાં ભૂનભસ્સ્વઃ પ્રભૃતિષુ વસતાં પ્રાણસૂક્ષ્માંશમેકમ્ ॥ ૯॥

આદિત્યે લોકચક્ષુષ્યવહિતમનસાં યોગિનાં દૃશ્યમન્તઃ
સ્વચ્છસ્વર્ણાભમૂર્તિં વિદલિતનલિનોદારદૃશ્યાક્ષિયુગ્મમ્ ।
ઋક્સામોદ્ગાનગેષ્ણં નિરતિશયલસલ્લોકકામેશભાવં
સર્વાવદ્યોદિતત્વાદુદિતસમુદિતં બ્રહ્મ શમ્ભું પ્રપદ્યે ॥ ૧૦॥

ઓમિત્યુદ્ગીથભક્તેરવયવપદવીં પ્રાપ્તવત્યક્ષરેઽસ્મિન્
યસ્યોપાસ્તિઃ સમસ્તં દુરિતમપનયત્વર્કબિમ્બે સ્થિતસ્ય ।
યત્ પૂજૈકપ્રધાનાન્યઘમખિલમપિ ઘ્નન્તિ કૃચ્છ્રવ્રતાનિ
ધ્યાતઃ સર્વોપતાપાન્ હરતુ પરશિવઃ સોઽયમાદ્યો ભિષઙ્નઃ ॥ ૧૧॥

આદિત્યે મણ્ડલાર્ચિઃ પુરુષવિભિદયાદ્યન્તમધ્યાગમાત્મ-
ન્યાગોપાલાઙ્ગનાભ્યો નયનપથજુષા જ્યોતિષા દીપ્યમાનમ્
ગાયત્રીમન્ત્રસેવ્યં નિખિલજનધિયાં પ્રેરકં વિશ્વરૂપમ્ ।
નીલગ્રીવં ત્રિને(ણે)ત્રં શિવમનિશમુમાવલ્લભં સંશ્રયામિ ॥ ૧૨॥

અભ્રાકલ્પઃ શતાઙ્ગઃ સ્થિરફણિતિમયં મણ્ડલં રશ્મિભેદાઃ
સાહસ્રાસ્તેષુ સપ્ત શ્રુતિભિરભિહિતાઃ કિઞ્ચિદૂનાશ્ચ લક્ષાઃ ।
એકૈકેષાં ચતસ્રસ્તદનુ દિનમણેરાદિદેવસ્ય તિસ્રઃ
ક્લૃપ્તાઃ તત્તત્પ્રભાવપ્રકટનમહિતાઃ સ્રગ્ધરા દ્વાદશૈતાઃ ॥ ૧૩॥

દુઃસ્વપ્નં દુર્નિમિત્તં દુરિતમખિલમપ્યામયાનપ્યસાધ્યાન્
દોષાન્ દુઃસ્થાનસંસ્થગ્રહગણજનિતાન્ દુષ્ટભૂતાન્ ગ્રહાદીન્ ।
નિર્ધૂનોતિ સ્થિરાં ચ શ્રિયમિહ લભતે મુક્તિમભ્યેતિ ચાન્તે
સઙ્કીર્ત્ય સ્તોત્રરત્નં સકૃદપિ મનુજઃ પ્રત્યહં પત્યુરહ્નામ્ ॥ ૧૪॥

॥ ઇતિ શ્રીમદપ્પય્યદીક્ષિતવિરચિતશ્રીમદાદિત્યસ્તોત્રરત્નમ્ ॥

Encoded and proofread by Usha Rani Sanka usharani dot sanka at gmail.com

*mahAmahimAnvitaM Adityastotram*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*